॥ श्रीगुरुभ्यो नमः ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

द्वितीयकाण्डे षष्ठः प्रश्नः

अवशिष्टकर्माभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

समिधो यजति वसन्तमेवर्तूनामव रुन्धे तनूनपातय्ँयजति ग्रीष्ममेवाव रुन्ध इडो यजति वर्षा एवाव रुन्धे बर्हिर् यजति शरदमेवाव रुन्धे स्वाहाकारय्ँयजति हेमन्तमेवाव रुन्धे तस्माथ् स्वाहाकृता हेमन् पशवोऽव सीदन्ति समिधो यजत्युषस एव देवतानामव रुन्धे तनूनपातय्ँयजति यज्ञमेवाव रुन्ध ॥ [१] ॥ इडो यजति पशूनेवाव रुन्धे बर्हिर् यजति प्रजामेवाव रुन्धे समान-यत उपभृतस्तेजो वा आज्यम्प्रजा बर्हिः प्रजास्वेव तेजो दधाति स्वाहाकारय्ँयजति वाचमेवाव रुन्धे दश सं पद्यन्ते दशाक्षरा विराडन्नव्ँविराड् विराजैवान्नाद्यमव रुन्धे समिधो यजत्यस्मिन्नेव लोके प्रति तिष्ठति तनूनपातय्ँयजति ॥ [२] ॥ यज्ञ एवान्तरिक्षे प्रति तिष्ठतीडो यजति पशु-ष्वेव प्रति तिष्ठति बर्हिर् यजति य एव देवयानाः पन्थानस्तेष्वेव प्रति तिष्ठति स्वाहाकारय्ँयजति सुवर्ग एव लोके प्रति तिष्ठत्येतावन्तो वै देवलोकास्तेष्वेव यथापूर्वम्प्रति तिष्ठति देवासुरा एषु लोकेष्वस्पर्द्धन्त ते देवाः प्रयाजैरेभ्यो लोकेभ्योऽसुरान् प्राणुदन्त तत् प्रयाजानां ॥ [३] ॥ प्रयाजत्वय्ँयस्यैवव्ँविदुषः प्रयाजा इज्यन्ते प्रैभ्यो लोकेभ्यो भ्रातृव्यान् नुदतेऽभिक्रामं जुहोत्यभि-जित्यै यो वै प्रयाजानाम्मिथुनव्ँवेद प्र प्रजया पशुभिर् मिथुनैर् जायते समिधो बह्वीरिव यजति तनूनपातमेकमिव मिथुनन्तदिडो बह्वीरिव यजति बर्हिरेकमिव मिथुनन्तदेतद्वै प्रयाजानाम्मि-थुनय्ँय एवव्ँवेद प्र ॥ [४] ॥ प्रजया पशुभिर् मिथुनैर् जायते देवानाव्ँवा अनिष्टा देवता आस-न्नथासुरा यज्ञमजिघाꣳसन् ते देवा गायत्रीव्ँव्यौहन् पञ्चाक्षराणि प्राचीनानि त्रीणि प्रतीची-

नानि ततो वर्म यज्ञायाभवद् वर्म यजमानाय यत् प्रयाजानूयाजा इज्यन्ते वर्मैव तद् यज्ञाय क्रियते वर्म यजमानाय भ्रातृव्याभिभूत्यै तस्माद्वरूथम्पुरस्ताद् वर्षीयः पश्चाद्ध्रसीयो देवा वै पुरा रक्षोभ्य ॥ [५] ॥ इति स्वाहाकारेण प्रयाजेषु यज्ञꣳ सꣳस्थाप्यमपश्यन् तꣳ स्वाहा-कारेण प्रयाजेषु समस्थापयन् वि वा एतद्यज्ञञ्छिन्दन्ति यथ् स्वाहाकारेण प्रयाजेषु सꣳस्थाप-यन्ति प्रयाजानिष्ट्वा हवीꣳष्यभि घारयति यज्ञस्य सन्तत्या अथो हविरेवाकरथो यथापूर्वमुपैति पिता वै प्रयाजाः प्रजाऽनूयाजा यत् प्रयाजानिष्ट्वा हवीꣳष्यभिघारयति पितैव तत् पुत्रेण साधा-रणं ॥ [६] ॥ कुरुते तस्मादाहुर्यश्चैवव्वेँद यश्च न कथा पुत्रस्य केवलङ्कथा साधारणम्पितुरि-त्यस्कन्नमेव तद्यत् प्रयाजेष्विष्टेषु स्कन्दति गायत्र्येव तेन गर्भन्धत्ते सा प्रजाम्पशून्यजमानाय प्र जनयति ॥ [७] ॥

(यजति यज्ञमेवाव रुन्धे तनूनपातय्यँजति प्रयाजाना मेवव्वेँद प्र रक्षोभ्यः साधारणं पञ्चत्रिꣳशच्च) ॥ १ ॥

चक्षुषी वा एते यज्ञस्य यदाज्यभागौ यदाज्यभागौ यजति चक्षुषी एव तद्यज्ञस्य प्रति दधाति पूर्वार्द्धे जुहोति तस्मात् पूर्वार्द्धे चक्षुषी प्रबाहुग्जुहोति तस्मात् प्रबाहुक् चक्षुषी देव-लोकव्वाँ अग्निना यजमानोऽनु पश्यति पितृलोकꣳ सोमेनोत्तरार्द्धेऽग्नये जुहोति दक्षिणार्द्धे सोमायैवमिव हीमौ लोकावनयोर् लोकयोरनुख्यात्यै राजानौ वा एतौ देवताना ॥ [८] ॥ य्यँदग्नीषोमावन्तरा देवता इज्येते देवतानाव्विँधृत्यै तस्माद्राज्ञा मनुष्या विधृता ब्रह्मवादिनो वदन्ति किन्तद्यज्ञे यजमानः कुरुते येनान्यतोदतश्च पशून् दाधारोभयतोदत श्चेत्यृचमनू-च्याऽऽज्यभागस्य जुषाणेन यजति तेनान्यतोदतो दाधारर्चमनूच्य हविष ऋचा यजति तेनो-भयतोदतो दाधार मूर्द्धन्वती पुरोनुवाक्या भवति मूर्द्धानमेवैनꣳ समानानाङ्करोति ॥ [९] ॥ नियुत्वत्या यजति भ्रातृव्यस्यैव पशून् नि युवते केशिनꣳ ह दार्भ्यङ्केशी सात्यकामिरुवाच सप्त-पदान्ते शक्करीꣳ श्वो यज्ञे प्रयोक्तासे यस्यै वीर्येण प्र जातान् भ्रातृव्यान् नुदते प्रति जनिष्य-माणान्यस्यै वीर्येणोभयोर्ल्लोकयोर् ज्योतिर् धत्ते यस्यै वीर्येण पूर्वार्द्धे नानड्वान् भुनक्ति जघ-नार्द्धेन धेनुरिति पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवति जातानेव भ्रातृव्यान् प्र णुदत उपरिष्टा-ल्लक्ष्मा ॥ [१०] ॥ याज्या जनिष्यमाणानेव प्रति नुदते पुरस्ताल्लक्ष्मा पुरोनुवाक्या भवत्य-

स्मिन्नेव लोके ज्योतिर् धत्त उपरिष्टाल्लक्ष्मा याज्याऽमुष्मिन्नेव लोके ज्योतिर्धत्ते ज्योतिष्मन्ता-वस्मा इमौ लोकौ भवतो य एवँवेद पुरस्तांल्लक्ष्मा पुरोनुवाक्या भवति तस्मात् पूर्वार्द्धेनानड्वान् भुनक्त्युपरिष्टाल्लक्ष्मा याज्या तस्माज्जघनार्द्धेन धेनुर् य एवँवेद भुङ्क्त एनमेतौ वज्र आज्यँवज्र आज्यभागौ ॥ [११] ॥ वज्रो वषट्कारस्त्रिवृतमेव वज्रꣳ संभृत्य भ्रातृव्याय प्र हरत्यछंबट्कारम-पगूर्य वषट् करोति स्तृत्यै गायत्री पुरोनुवाक्या भवति त्रिष्टुग् याज्या ब्रह्मन्नेव क्षत्रमन्वारंभयति तस्माद् ब्राह्मणो मुख्यो मुख्यो भवति य एवँवेद प्रैवैनम्पुरोनुवाक्ययाऽऽह प्र णयति याज्यया गमयति वषट्कारेणैवैनम्पुरोनुवाक्यया दत्ते प्र यच्छति याज्यया प्रति ॥ [१२] ॥ वषट्कारेण स्थापयति त्रिपदा पुरोनुवाक्या भवति त्रय इमे लोका एष्वेव लोकेषु प्रति तिष्ठति चतुष्पदा याज्या चतुष्पद एव पशूनव रुन्धे द्व्यक्षरो वषट्कारो द्विपाद्यजमानः पशुष्वेवोपरिष्टात् प्रतिति-ष्ठति गायत्री पुरोनुवाक्या भवति त्रिष्टुग् याज्यैषा वै सप्तपदा शक्वरी यद्वा एतया देवा अशिक्षन् तदशक्नुवन्य एवँवेद शक्नोत्येव यच्छिक्षति ॥ [१३] ॥

(देवतानां करोत्यु परिष्टाल्लक्ष्मा ऽऽज्यभागौ प्रति शक्नोत्येव द्वे च) ॥ २ ॥

प्रजापतिर् देवेभ्यो यज्ञान् व्यादिशथ् स आत्मन्नाज्यमधत्त तन्देवा अब्रुवन्नेष वाव यज्ञो यदाज्यमप्येव नोऽत्रास्त्विति सोऽब्रवीद्यजान्व आज्यभागावुप स्तृणानभि घारयानिति तस्मा-द्यजन्त्याज्यभागावुप स्तृणन्त्यभि घारयन्ति ब्रह्मवादिनो वदन्ति कस्माथ् सत्याद् यात-यामान्यन्यानि हवीꣳष्ययातयाममाज्यमिति प्राजापत्य ॥ [१४] ॥ मिति ब्रूयादयातयामा हि देवानाम्प्रजापतिरिति छन्दाꣳसि देवेभ्योऽपाक्रामन् न वोऽभागानि हव्यँवक्ष्याम इति तेभ्य एतच्चतुरवत्तमधारयन् पुरोनुवाक्यायै याज्यायै देवतायै वषट्काराय यच्चतुरवत्तञ्जुहोति छन्दाꣳस्येव तत् प्रीणाति तान्यस्य प्रीतानि देवेभ्यो हव्यँवहन्त्यङ्गिरसो वा इत उत्तमाः सुवर्गँल्लोकमायन् तदृषयो यज्ञवास्त्वभ्यवायन् ते ॥ [१५] ॥ ऽपश्यन् पुरोडाशङ्कूर्मम्भूतꣳ सर्पन्तन्तमब्रुवन्निन्द्राय ध्रियस्व बृहस्पतये ध्रियस्व विश्वेभ्यो देवेभ्यो ध्रियस्वेति स नाध्रि-यत तमब्रुवन्नग्नये ध्रियस्वेति सोऽग्नयेऽध्रियत यदाग्नेयोऽष्टाकपालोऽमावास्यायाञ्च पौर्णमा-स्याञ्चाऽच्युतो भवति सुवर्गस्य लोकस्याभिजित्यै तमब्रुवन् कथाऽहास्था इत्यनुपाक्तोऽभूव-

मित्यब्रवीद्यथाऽख्षोऽनुपाक्तो ॥ [१६] ॥ ऽवाच्छंत्येवमवाऽऽरमित्युपरिष्टादभ्यज्याऽधस्तादुपानक्ति सुवर्गस्य लोकस्य समष्ट्यै सर्वाणि कपालान्यभि प्रथयति तावतः पुरोडाशानमुष्मिँल्लोकेऽभि जयति यो विदग्धः स नैर्ऋतो योऽश्रृतः स रौद्रो यः शृतः स सदेवस्तस्मादविदहता शृतंकृत्यः सदेवत्वाय भस्मनाऽभि वासयति तस्मान्माꣳसेनास्थि छन्नव्वँदेनाभि वासयति तस्मात् ॥ [१७] ॥ केशैः शिर श्छन्नम्प्रच्युतव्वाँ एतदस्माल्लोकादगतन्देवलोकय्यँच्छृतꣳ हविरनभिघारित मभिघार्योद्वासयति देवत्रैवैनद्गमयति यद्येकङ्कपालन्नश्येदेको मासः सव्वँथ्सरस्यानवेतः स्यादथ यजमानः प्र मीयेत यद् द्वे नश्येतान्द्वौ मासौ सव्वँथ्सरस्यानवेतौ स्यातामथ यजमानः प्र मीयेत सङ्ख्यायोद्वासयति यजमानस्य ॥ [१८] ॥ गोपीथाय यदि नश्येदाश्विनन्द्विकपालन्निर्वपेद् द्यावापृथिव्यमेककपालमश्विनौ वै देवानां भिषजौ ताभ्यामेवास्मै भेषजङ्करोति द्यावापृथिव्य एककपालो भवत्यनयोर् वा एतन्नश्यति यन्नश्य त्यनयोरेवैनद्विन्दति प्रतिष्ठित्यै ॥ [१९] ॥

(प्राजापत्यं ते ऽख्षोऽनुपाक्तो वेदेनाभि वासयति तस्माद् यजमानस्य द्वात्रिꣳशच्च) ॥ ३ ॥

देवस्य त्वा सवितुः प्रसव इति स्फ्यमा दत्ते प्रसूत्या अश्विनोर् बाहुभ्यामित्याहाश्विनौ हि देवानामद्ध्वर्यू आस्तांम्पूष्णो हस्ताभ्यामित्याह यत्यै शतभृष्टिरसि वानस्पत्यो द्विषतो वध इत्याह वज्रमेव तथ् सꣳ श्यति भ्रातृव्याय प्रहरिष्यन्थ् स्तंबयजुर्हरत्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव भ्रातृव्यन्निर्भजति ॥ [२०] ॥ तस्मान्नाभागन्निर्भजन्ति त्रिर्हरति त्रय इमे लोका एभ्य एवैनल्लोकेभ्यो निर्भजति तूष्णीञ्चतुर्थꣳ हरत्यपरिमितादेवैनन्निर्भजत्युद्धन्ति यदेवास्या अमेद्ध्यन्तदप हन्त्युद्धन्ति तस्मादोषधयः परा भवन्ति मूलञ्छिनत्ति भ्रातृव्यस्यैव मूलञ्छिनत्ति पितृदेवत्याऽतिखातेयतीङ्खनति प्रजापतिना ॥ [२१] ॥ यज्ञमुखेन संमितामा प्रतिष्ठायै खनति यजमानमेव प्रतिष्ठाङ्गमयति दख्षिणतो वर्षीयसीङ्करोति देवयजनस्यैव रूपमकः पुरीषवतीङ्करोति प्रजा वै पशवः पुरीषं प्रजयैवैनम्पशुभिः पुरीषवन्तङ्करोत्युत्तरम्परिग्राहम्परि गृह्णात्येतावती वै पृथिवी यावती वेदिस्तस्या एतावत एव भ्रातृव्यन्निर्भज्याऽऽत्मन उत्तरम्परिग्राहम्परि गृह्णाति क्रूरमिव वा ॥ [२२] ॥ एतत् करोति यद् वेदिङ्करोति धा असि स्वधा

असीति योयुप्यते शान्त्यै प्रोक्षणीरा सादयत्यापो वै रक्षोघ्नी रक्षसामपहत्यै स्फ्यस्य वर्त्मन्थ् सादयति यज्ञस्य सन्तत्यै यन्द्विष्यात् तन्ध्यायेच्छुचैवैनमर्पयति ॥ [२३] ॥

(भजति प्रजापतिने व वै त्रयस्त्रिꣳशच्च) ॥ ४ ॥

ब्रह्मवादिनो वदन्त्यद्भिर्हवीꣳषि प्रौक्षीः केनाप इति ब्रह्मणेति ब्रूयादद्भिर्ह्येव हवीꣳषि प्रोक्षति ब्रह्मणाऽप इद्ध्माबर्हिः प्रोक्षति मेद्ध्यमेवैनत् करोति वेदिम्प्रोक्षत्यृक्षा वा एषाऽलोमकाऽमेद्ध्या यद्वेदिर् मेद्ध्यामेवैनाङ्करोति दिवे त्वाऽन्तरिक्षाय त्वा पृथिव्यै त्वेति बर्हिरासाद्य प्रो ॥ [२४] ॥ क्षत्येभ्य एवैनल्लोकेभ्यः प्रोक्षति क्रूरमिव वा एतत् करोति यत् खनत्यपो नि नयति शान्त्यै पुरस्तात् प्रस्तरङ्गृह्णाति मुख्यमेवैनङ्करोतीयन्तङ्गृह्णाति प्रजापतिना यज्ञमुखेन संमितम्बर्हिः स्तृणाति प्रजा वै बर्हिः पृथिवी वेदिः प्रजा एव पृथिव्यां प्रति ष्ठापयत्यनतिदृश्नꣳ स्तृणाति प्रजयैवैनम्पशुभिरनतिदृश्नङ्करो ॥ [२५] ॥ त्युत्तरम्बर्हिषः प्रस्तरꣳ सादयति प्रजा वै बर्हिर् यजमानः प्रस्तरो यजमानमेवायजमानादुत्तरङ्करोति तस्माद्यजमानोऽयजमानादुत्तरोऽन्तर् दधाति व्यावृत्त्या अनक्ति हविष्कृतमेवैनꣳ सुवर्गँल्लोकङ्गमयति त्रेधाऽनक्ति त्रय इमे लोका एभ्य एवैनँल्लोकेभ्योऽनक्ति न प्रति शृणाति यत् प्रतिशृणीयादनूँद्ध्वंभावुकय्ँयजमानस्य स्यादुपरीव प्र हर ॥ [२६] ॥ त्युपरीव हि सुवर्गो लोको नि यच्छति वृष्टिमेवास्मै नि यच्छति नात्यग्रम्प्र हरेद्यदत्यग्रम्प्रहरेदत्यासारिण्यद्ध्वर्योर् नाशुका स्यान्न पुरस्तात् प्रत्यस्येद्यत् पुरस्तात् प्रत्यस्येथ् सुवर्गाल्लोकाद्यजमानम्प्रति नुदेत् प्राञ्चम्प्र हरति यजमानमेव सुवर्गँल्लोकङ्गमयति न विष्वञ्चव्ँवि युयाद्यद्विष्वञ्चव्ँवियुयाथ् ॥ [२७] ॥ स्त्र्यस्य जायेतोद्ध्वमुद्यौत्यूद्ध्वमिव हि पुꣳसः पुमानेवास्य जायते यथ् स्फ्येन वोपवेषेण वा योयुप्येत स्तृतिरेवास्य सा हस्तेन योयुप्यते यजमानस्य गोपीथाय ब्रह्मवादिनो वदन्ति किय्ँयज्ञस्य यजमान इति प्रस्तर इति तस्य क्व सुवर्गो लोक इत्याहवनीय इति ब्रूयाद्यत् प्रस्तरमाहवनीये प्रहरति यजमानमेव ॥ [२८] ॥ सुवर्गँल्लोकङ्गमयति वि वा एतद्यजमानो लिशते यत् प्रस्तरय्ँयोयुप्यन्ते बर्हिरनु प्र हरति शान्त्या अनारम्भण इव वा एतर्ह्यद्ध्वर्युः स ईश्वरो वेपनो भवितोर् ध्रुवाऽसीतीमामभि मृशतीयव्ँवै ध्रुवाऽस्यामेव प्रति तिष्ठति न वेपनो भवत्यगा(३) नग्नीदित्याह

यद्ब्रूयाद् गन्ताग्निरित्य ग्रावग्निङ्गमयेन्निर् यजमानꣳ सुवर्गाल्लोकाद् भजेदगन्नित्येव ब्रूयाद् यजमा-
नमेव सुवर्गँल्लोकङ्गमयति ॥ [२९] ॥

(आसाद्य प्रा नतिद्दरञ्जङ्करोति हरति वियुयाद् यजमानमेवाऽग्निरिति सप्तदश च) ॥ ५ ॥

अग्नेस्त्रयो ज्यायाꣳसो भ्रातर आसन् ते देवेभ्यो हव्यँव्वहन्तः प्रामीयन्त सोऽग्निरबिभेदित्थ-
वँव्वाव स्य आर्तिमाऽरिष्यतीति स निलायत सोऽपः प्राविशत् तन्देवताः प्रैषमैच्छन् तम्मथ्स्यः
प्राब्रवीत् तमशपद्धियाधिया त्वा वद्ध्यासुर्यो मा प्रावोच इति तस्मान्मथ्स्यन्धियाधिया घ्नन्ति
शप्तो ॥ [३०] ॥ हि तमन्वविन्दन् तमब्रुवन्नुप न आ वर्तस्व हव्यन्नो वहेति सोऽब्रवीद् वर-
वँव्वृणै यदेव गृहीतस्याहुतस्य बहिःपरिधि स्कन्दात् तन्मे भ्रातृणाम्भागधेयमसदिति तस्माद्यद्
गृहीतस्याहुतस्य बहिः परिधि स्कन्दति तेषान्तद्भागधेयन्तानेव तेन प्रीणाति परिधीन् परि
दधाति रक्षसामपहत्यै सꣳ स्पर्शयति ॥ [३१] ॥ रक्षसामनन्ववचाराय न पुरस्तात् परि
दधात्यादित्यो ह्येवोद्यन् पुरस्ताद्रक्षाꣳस्यपहन्त्यूर्द्ध्वे समिधावा दधात्युपरिष्टादेव रक्षाꣳस्यप
हन्ति यजुषाऽन्यान्तूष्णीमन्याम्मिथुनत्वाय द्वे आ दधाति द्विपाद्यजमानः प्रतिष्ठित्यै ब्रह्मवादिनो
वदन्ति स त्वै यजेत यो यज्ञस्याऽऽर्त्या वसीयान्थ् स्यादिति भूपतये स्वाहा भुवनपतये स्वाहा
भूतानां ॥ [३२] ॥ पतये स्वाहेति स्कन्नमनु मन्त्रयेत यज्ञस्यैव तदार्त्या यजमानो वसीयान्
भवति भूयसीर्हि देवताः प्रीणाति जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपाꣳशुया-
जमन्तरा यजत्यजामित्वायाथो मिथुनत्वायाग्निरमुष्मिँल्लोक आसीद्यमोऽस्मिन् ते देवा अब्रुव-
न्नेतेमौ वि पर्यूहामेत्यन्नाद्येन देवा अग्नि ॥ [३३] ॥ मुपामन्त्रयन्त राज्येन पितरो यमन्तस्मा-
दग्निर् देवानामन्नादो यमः पितृणाꣳ राजा य एवँव्वेद प्र राज्यमन्नाद्यमाप्नोति तस्मा एतद्भागधेय-
म्प्रायच्छन्यदग्नये स्विष्टकृतेऽवद्यन्ति यदग्नये स्विष्टकृतेऽवद्यति भागधेयेनैव तद्रुद्रꣳ समर्द्धयति
सकृथ्सकृदव द्यति सकृदिव हि रुद्र उत्तरार्द्धादव द्यत्येषा वै रुद्रस्य ॥ [३४] ॥ दिख स्वाया-
मेव दिशि रुद्रन्निरवदयते द्विरभि घारयति चतुरवत्तस्याऽऽप्त्यै पशवो वै पूर्वा आहुतय एष रुद्रो
यदग्निर् यत् पूर्वा आहुतीरभि जुहुयाद्रुद्राय पशूनपि दद्ध्यादपशुर् यजमानः स्यादतिहाय पूर्वा
आहुतीर् जुहोति पशूनाङ्गोपीथाय ॥ [३५] ॥

(श॒प्तः स्पर्॒शयति भू॒तानां॑ म॒ग्निꣳ रु॒द्रस्य॑ स॒प्तत्रिꣳ॑शच्च) ॥ ६ ॥

मनुः॑ पृथि॒व्या य॒ज्ञिय॑मैच्छ॒थ् स घृ॒तन्निषि॑क्तमविन्द॒थ् सो᳚ऽब्रवी॒त् को᳚ऽस्येश्व॒रो य॒ज्ञेऽपि॒ कर्तो॒रिति॒ ताव॑ब्रूताम्मि॒त्रावरु॑णौ॒ गोरे॒वाऽऽवमी᳚श्व॒रौ कर्तौ᳚ः स्व॒ इति॒ तौ तत॒ो गाꣳ समै॑रयता॒ꣳ॒ सा यत्र॑यत्र॒ न्यक्रा॑म॒त् ततो॑ घृ॒तम॑पीड्यत॒ तस्मा᳚द्घृ॒तप॑द्युच्यते॒ तद॑स्यै॒ जन्मोप॑हूतꣳ रथन्त॒रꣳ स॒ह पृ॑थि॒व्येत्या॑हे॒ ॥ [३६] ॥ यँव्वै र॑थन्त॒रमि॒मामे॒व स॒हान्ना॒द्येनोप॑ ह्वयत॒ उप॑हूतँव्वामदे॒व्यꣳ स॒हान्तरि॑ख्षे॒णेत्या॑ह प॒शवो॒ वै वा॑मदे॒व्यम्प॒शूने॒व स॒हान्तरि॑ख्षे॒णोप॑ ह्वयत॒ उप॑हूतम्बृ॒हथ् स॒ह दि॒वेत्या॑है॒रँव्वै बृ॒हदिरा॑मे॒व स॒ह दि॒वोप॑ ह्वयत॒ उप॑हूताः स॒प्त होत्रा॒ इत्या॑ह॒ होत्रा॑ ए॒वोप॑ ह्वयत॒ उप॑हूता धे॒नुः ॥ [३७] ॥ स॒ह॒र्ष॒भेत्या॑ह मिथु॒नमे॒वोप॑ ह्वयत॒ उप॑हूतो भ॒ख्षः स॒खेत्या॑ह सोमपी॒थमे॒वोप॑ ह्वयत॒ उप॑हू॒तां(३) हो इत्या॑हा॒ऽऽत्मान॑मे॒वोप॑ ह्वयत आ॒त्मा ह्युप॑हूताना॒ँव्वसि॑ष्ठ इडा॒मुप॑ ह्वयते प॒शवो॒ वा इडा॑ प॒शूने॒वोप॑ ह्वयते च॒तुरुप॑ ह्वयते॒ चतु॑ष्पादो॒ हि प॒शवो॑ मान॒वीत्या॑ह॒ मनु॒र् ह्ये॑ता ॥ [३८] ॥ मग्रेऽप॑श्यद्घृ॒तप॒दीत्या॑ह॒ यदे॒वास्यै॑ प॒दाद्घृ॒तमपी᳚ड्यत॒ तस्मा॑दे॒वमा॑ह मैत्राव॒रु॒णीत्या॑ह मि॒त्रावरु॑णौ॒ ह्ये॑नाꣳ स॒मैर॑यता॒म्ब्रह्म॑ दे॒वकृ॑त॒ मुप॑हूत॒मित्या॑ह॒ ब्रह्मै॒वोप॑ ह्वयते॒ दैव्या॑ अद्ध्व॒र्यव॒ उप॑हूता॒ उप॑हूता मनु॒ष्या॑ इत्या॑ह देवमनु॒ष्याने॒वोप॑ ह्वयते॒ य इ॒मँय्य॒ज्ञमवा॒न्ये य॒ज्ञप॑ति॒ँव्वर्द्धा॒नित्या॑ह ॥ [३९] ॥ य॒ज्ञाय॑ चै॒व यज॑मानाय चा॒ऽऽशिष॒मा शा᳚स्त॒ उप॑हूते॒ द्यावा॑पृथि॒वी इत्या॑ह॒ द्यावा॑पृथि॒वी ए॒वोप॑ ह्वयते पूर्व॒जे ऋ॒तावरी॒ इत्या॑ह पूर्व॒जे ह्ये॑ते ऋ॒तावरी॒ दे॒वी दे॒वपु॑त्रे॒ इत्या॑ह दे॒वी ह्ये॑ते दे॒वपु॑त्रे॒ उप॑हूतो॒ऽयँय्यज॑मान॒ इत्या॑ह॒ यज॑मानमे॒वोप॑ ह्वयत॒ उत्त॑रस्यां देवय॒ज्याया॒मुप॑हूतो॒ भूय॑सि हवि॒ष्कर॑ण॒ उप॑हूतो दि॒व्ये धाम॒न्नुप॑हूत॒ ॥ [४०] ॥ इत्या॑ह प्र॒जा वा उत्त॑रा देव॒यज्या॑ प॒शवो॒ भूयो॑ हवि॒ष्कर॑णꣳ सुव॒र्गो लो॒को दि॒व्यन्धामे॒दम॑सी॒द॒मसी॒त्ये॒व य॒ज्ञस्य॑ प्रि॒यन्धामोप॑ ह्वयते॒ विश्व॑मस्य प्रि॒यमुप॑हूत॒मित्या॒हाछं॑बट्का॒रमे॒वोप॑ ह्वयते ॥ [४१] ॥

(आ॒ह॒धे॒नु॒ रे॒तांवर्द्धा॒नित्या॑ह॒ धाम॒न्नुप॑हूत॒ श्चतु॑स्त्रिꣳशच्च) ॥ ७ ॥

प॒शवो॒ वा इडा᳚ स्व॒यमा द॑त्ते॒ काम॑मे॒वाऽऽत्मना॑ प॒शूनामा द॑त्ते॒ न ह्य॑न्यः काम॑म्प॒शूनाम्प्र॒यच्छ॑ति वा॒चस्पत॑ये त्वा हु॒तम्प्राश्ञा॒मीत्या॑ह॒ वाच॑मे॒व भा॑ग॒धेये॑न प्रीणाति॒ सद॑स॒स्पत॑ये

त्वा हुतम्प्राश्ञामीत्याह स्वगाकृत्यै चतुरवत्तम्भवति हविर्वै चतुरवत्तम्पशवश्चतुरवत्तय्यँद्धोता प्राश्ञीयाद्धोता ॥ [४२] ॥ ऽऽर्तिमार्च्छेद्यदग्नौ जुहुयाद्रुद्राय पशूनपि दध्यादपशुर् यजमानः स्याद्वाचस्पतये त्वा हुतम्प्राश्ञामीत्याह परोख्षमेवनञ्जुहोति सदसस्पतये त्वा हुतम्प्राश्ञामीत्याह स्वगाकृत्यै प्राश्ञन्ति तीर्थ एव प्राश्ञन्ति दख्षिणान्ददाति तीर्थ एव दख्षिणान्ददाति वि वा एतद् यज्ञं ॥ [४३] ॥ छिन्दन्ति यन्मध्यतः प्राश्ञन्त्यद्भिर् मार्जयन्त आपो वै सर्वा देवता देवताभिरेव यज्ञꣳ सन्तन्वन्ति देवा वै यज्ञाद्रुद्रमन्तरायन्थ् स यज्ञमविध्यत् तन्देवा अभि समगच्छन्त कल्पतान्न इदमिति तेऽब्रुवन्थ् स्विष्टँवै न इदम्भविष्यति यदिमꣳ राधयिष्याम इति तथ् स्विष्टकृतः स्विष्टकृत्त्वन्तस्याऽऽविद्धन्नि ॥ [४४] ॥ रकृन्तन्यवेन सम्मितन्तस्माद्यवमात्रमव द्येद्यज्ज्यायोऽवद्येद्रोपयेत् तद्यज्ञस्य यदुप च स्तृणीयादभि च धारयेदुभयतःसꣳश्वायि कुर्यादवदायाभि घारयति द्विः सम्पद्यते द्विपाद्यजमानः प्रतिष्ठित्यै यत् तिरश्चीनमतिहरेदनभिविद्धय्यँज्ञस्याभि विध्येदग्रेण परि हरति तीर्थेनैव परि हरति तत् पूष्णे पर्यहरन् तत् ॥ [४५] ॥ पूषा प्राश्य दतोऽरुणत् तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि तन्देवा अब्रुवन् वि वा अयमार्द्ध्यप्राशित्रियो वा अयमभूदिति तद्बृहस्पतये पर्यहरन्थ् सोऽबिभेद् बृहस्पतिरित्थँवाव स्य आर्तिमाऽरिष्यतीति स एतम्मन्त्रमपश्यथ् सूर्यस्य त्वा चख्षुषा प्रति पश्यामीत्यब्रवीन्न हि सूर्यस्य चख्षुः ॥ [४६] ॥ किञ्चन हिनस्ति सोऽबिभेत् प्रतिगृह्णन्तम्मा हिꣳसिष्यतीति देवस्य त्वा सवितुः प्रसवेऽश्विनोर् बाहुभ्याम्पूष्णो हस्ताभ्याम्प्रति गृह्णामीत्यब्रवीथ् सवितृप्रसूत एवैनद् ब्रह्मणा देवताभिः प्रत्यगृह्णाथ् सोऽबिभेत् प्राश्ञन्तम्मा हिꣳसिष्यतीत्यग्नेस्त्वाऽऽस्येन प्राश्ञामीत्यब्रवीन्न ह्यग्नेरास्यङ्किञ्चन हिनस्ति सोऽबिभेत् ॥ [४७] ॥ प्राशितम्मा हिꣳसिष्यतीति ब्राह्मणस्योदरेणेत्य ब्रवीन्न हि ब्राह्मणस्योदरङ्किञ्चन हिनस्ति बृहस्पतेर् ब्रह्मणेति स हि ब्रह्मिष्ठोऽप वा एतस्मात् प्राणाः क्रामन्ति यः प्राशित्रं प्राश्ञात्यद्भिर् मार्जयित्वा प्राणान्थ् सम्मृशतेऽमृतँवै प्राणा अमृतमापः प्राणानेव यथास्थानमुप ह्वयते ॥ [४८] ॥

(चतुश्चत्वारिꣳशच्च) ॥ ८ ॥

अग्नीध आ दधात्यग्निमुखानेवर्तून् प्रीणाति समिधमा दधात्युत्तरासामाहुतीनाम्प्रतिष्ठित्या अथो समिद्वत्येव जुहोति परिधीन्थ् सम्मार्ष्टि पुनात्येवैनान्थ् सकृथ् सकृथ् सम्मार्ष्टि पराङिव ह्येतर्हि यज्ञश्चतुः सम्पद्यते चतुष्पादः पशवः पशूनेवाव रुन्धे ब्रह्मन् प्र स्थास्याम इत्याहात्र वा एतर्हि यज्ञः श्रितो ॥ [४९] ॥ यत्र ब्रह्मा यत्रैव यज्ञः श्रितस्तत एवैनमा रभते यद्धस्तेन प्रमीवेद् वेपनः स्याद्यच्छीर्ष्णा शीर्षक्तिमान्थ् स्याद्यत् तूष्णीमासीताऽसंप्रत्तो यज्ञः स्यात् प्र तिष्ठेत्येव ब्रूयाद्वाचि वै यज्ञः श्रितो यत्रैव यज्ञः श्रितस्तत एवैनꣳ सम्प्र यच्छति देव सवितरेतत् ते प्रा ॥ [५०] ॥ ऽऽहेत्याह प्रसूत्यै बृहस्पतिर् ब्रह्मेत्याह स हि ब्रह्मिष्ठः स यज्ञम्पाहि स यज्ञपतिम्पाहि स माम्पाहीत्याह यज्ञाय यजमानायाऽऽत्मने तेभ्य एवाऽऽशिषमा शास्तेऽनार्त्या आश्राव्याऽऽह देवान्यजेति ब्रह्मवादिनो वदन्तीष्टा देवता अथ कतम एते देवा इति छन्दाꣳसीति ब्रूयाद्गायत्रीं त्रिष्टुभं ॥ [५१] ॥ जगतीमित्यथो खल्वाहुर्ब्राह्मणा वै छन्दाꣳसीति तानेव तद्यजति देवानाँव्वा इष्टा देवता आसन्नथाग्निर् नोदज्वलत् तन्देवा आहुतीभि रनूयाजेष्वन्वविन्दन्यदनूयाजान् यजत्यग्निमेव तथ् समिन्ध एतदुर् वै नामाऽऽसुर आसीथ् स एतर्हि यज्ञस्याऽऽशिषमवृङ्क्त यद् ब्रूयादेत ॥ [५२] ॥ दु द्यावापृथिवी भद्रमभूदित्येतदुमेवाऽऽसुरँय्यँज्ञस्याऽऽशिषङ्गमयेदिदन्द्यावापृथिवी भद्रमभूदित्येव ब्रूयाद्यजमानमेव यज्ञस्याऽऽशिषङ्गमयत्यादृध्म सूक्तवाकमुत नमोवाकमित्याहेदमराथ्स्मेति वावैतदाहोपश्रितो दिवः पृथिव्योरित्याह द्यावापृथिव्योर्हि यज्ञ उपश्रित ओमन्वती तेऽस्मिन् यज्ञे यजमान द्यावापृथिवी ॥ [५३] ॥ स्तामित्याहाऽऽशिषमेवैतामा शास्ते यद्ब्रूयाथ् सूपावसाना च स्वध्यवसाना चेति प्रमायुको यजमानः स्याद्यदा हि प्रमीयतेऽथेमामुपावस्यति सूपचरणा च स्वधिचरणा चेत्येव ब्रूयाद् वरीयसीमेवास्मै गव्यूतिमा शास्ते न प्रमायुको भवति तयोराविद्यग्निरिदꣳ हविरजुषतेत्याह या अयाक्ष्म ॥ [५४] ॥ देवतास्ता अरीरधामेति वावैतदाह यन्न निर्दिशेत् प्रतिवेशयँय्यज्ञस्याऽऽशीर् गच्छेदा शास्तेऽयँय्यजमानोऽसावित्याह निर्दिश्यैवैनꣳ सुवर्गँल्लोकङ्गमयत्यायुरा शास्ते सुप्रजास्त्वमा शास्त इत्याहाऽऽशिषमेवैतामा शास्ते सजातवनस्यामा शास्त इत्याह प्राणा वै सजाताः प्राणानेव ॥ [५५] ॥ नान्तरेति तदग्निर् देवो देवेभ्यो वनते वयमग्नेर् मानुषा

इत्याहाग्निर् देवेभ्यो वनुते वयं मनुष्येभ्य इति वावैतदाहेह गतिर् वामस्येदञ्च नमो देवेभ्य इत्याह याश्चैव देवता यजति याश्च न ताभ्य एवोभयीभ्यो नमस्करोत्यात्मनोऽनार्त्यै ॥ [५६] ॥

(श्रित स्ते प्र त्रिष्टुभं मेतद् द्यावापृथिवी या अयाँरत्ष्म प्राणानेव षट्चत्वारिꣳशच्च) ॥ ९ ॥

देवा वै यज्ञस्य स्वगाकर्तारन्नाविन्दन् ते शँय्युम्बार्हस्पत्यमब्रुवन्निमन्नो यज्ञꣳ स्वगा कुर्विति सोऽब्रवीद्वरँव्वृणै यदेवाब्राह्मणोक्तोऽश्रद्दधानो यजातै सा मे यज्ञस्याऽऽशीरसदिति तस्माद् यद-ब्राह्मणोक्तोऽश्रद्दधानो यजते शँय्युमेव तस्य बार्हस्पत्यँय्यज्ञस्याऽऽशीर् गच्छत्येतन्ममेत्य-ब्रवीत् किम्मे प्रजाया ॥ [५७] ॥ इति योऽपगुरातै शतेन यातयाद्यो निहनत्सहस्रेण यात-याद्यो लोहितङ्करवद्यावतः प्रस्कद्य पाꣳसून्थ् सङ्गृह्णात् तावतः सँव्वथ्सरान् पितृलोकन्न प्र जाना-दिति तस्माद् ब्राह्मणाय नाप गुरेत न नि हन्यान्न लोहितङ्कुर्यादेतावता हैनसा भवति तच्छँय्योरा वृणीमह इत्याह यज्ञमेव तथ् स्वगा करोति त ॥ [५८] ॥ च्छँय्योरा वृणीमह इत्याह शँय्युमेव बार्हस्पत्यम्भागधेयेन समर्द्धयति गातुँय्यज्ञाय गातुँय्यज्ञपतय इत्याहाऽऽशिषमेवैतामा शास्ते सोमँय्यजति रेत एव तद्दधाति त्वष्टारँय्यजति रेत एव हितन्त्वष्टा रूपाणि वि करोति देवानाम्पत्नीर् यजति मिथुनत्वायाग्निङ्गृहपतिँय्यजति प्रतिष्ठित्यै जामि वा एतद्यज्ञस्य क्रियते ॥ [५९] ॥ यदाज्येन प्रयाजा इज्यन्त आज्येन पत्नीसँय्याजा ऋचमनूच्य पत्नीसँय्याजानामृचा यजत्यजा-मित्वायाथो मिथुनत्वाय पङ्क्तिप्रायणो वै यज्ञः पङ्क्त्युदयनः पञ्च प्रयाजा इज्यन्ते चत्वारः पत्नीस-ँय्याजाः समिष्टयजुः पञ्चमम्पङ्क्तिमेवानु प्रयन्ति पङ्क्तिमनूद्यन्ति ॥ [६०] ॥

(प्रजायाः करोति तत् क्रियते त्रयस्त्रिꣳशच्च) ॥ १० ॥

युक्ष्वाहि देवहूतमाꣳ अश्वाꣳ अग्ने रथीरिव। नि होता पूर्व्यः सदः॥ उत नो देव देवाꣳ अच्छा वोचो विदुष्टरः। श्रद्विश्वा वार्या कृधि॥ त्वꣳ ह यद्यविष्ठ्य सहसः सूनवाहुत। ऋतावा यज्ञियो भुवः॥ अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः। मूर्द्धा कवी रयीणाम्॥ तन्नेमिमृ-भवो यथाऽऽनमस्व सहूतिभिः। नेदीयो यज्ञ ॥ [६१] ॥ मङ्गिरः॥ तस्मै नूनमभिद्यवे वाचा

विरूप नित्यया। वृष्णे चोदस्व सुष्टुतिम्॥ कमु ष्विदस्य सेनयाऽग्नेरपाकचक्षसः। पणिङ्गोषु स्तरामहे॥ मा नो देवानाव्विँशः प्रस्नातीरिवोस्राः। कृशन्न हासुरघ्नियाः॥ मा नः समस्य दूढ्यः परिद्वेषसो अꣳहुतिः। ऊर्मिर् न नावमा वधीत्॥ नमस्ते अग्न ओजसे गृणन्ति देव कृष्टयः। अमै ॥ [६२] ॥ रमित्रमर्दय॥ कुविथ् सु नो गविष्टयेऽग्ने सव्वेँषिषो रयिम्। उरुकृदुरु णः स्कृधि॥ मा नो अस्मिन् महाधने परा वर्ग् भारभृद्यथा। सव्वँर्गꣳ सꣳ रयिञ्जय॥ अन्यमस्मद् भिया इयमग्ने सिषक्तु दुच्छुना। वर्द्धा नो अमवच्छवः॥ यस्याजुषन्नमस्विनः शमीमदुर्मखस्य वा। तङ्घेदग्निर् वृधाऽवति॥ परस्या अधि ॥ [६३] ॥ सव्वँतोऽवराꣳ अभ्या तर। यत्राहमस्मि ताꣳ अव॥ विद्मा हि ते पुरा वयमग्ने पितुर् यथाऽवसः। अधा ते सुम्नमीमहे॥ य उग्र इव शर्यहा तिग्मशृङ्गो न वꣳसगः। अग्ने पुरो रुरोजिथ॥ सखायः सव्वँः सम्यञ्चमिषꣳ स्तोमञ्चाग्नये। वर्षिष्ठाय क्षितीनामूर्जो नप्त्रे सहस्वते॥ सꣳसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ। इडस्पदे समिध्यसे स नो वसून्या भर। प्रजापते >१, स वेद>२, सोमापूषणे>३, मौ देवौ>४ ॥ [६४] ॥

(यज्ञ ममै रधि वृष त्रेकान्नविꣳशतिश्च) ॥ ११ ॥

उशन्तस्त्वा हवामह उशन्तः समिधीमहि। उशन्नुशत आ वह पितॄन् हविषे अत्तवे॥ त्वꣳ सोम प्रचिकितो मनीषा त्वꣳ रजिष्ठमनु नेषि पन्थाम्। तव प्रणीती पितरो न इन्दो देवेषु रत्नमभजन्त धीराः॥ त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः। वन्वन्नवातः परिधीꣳ रपोर्णु वीरेभिरश्वैर् मघवा भवा ॥ [६५] ॥ नः॥ त्वꣳ सोम पितृभिः सव्विँदानोऽनु द्यावापृथिवी आ ततन्थ। तस्मै त इन्दो हविषा विधेम वयꣳ स्याम पतयो रयीणाम्॥ अग्निष्वात्ताः पितर एह गच्छत सदःसदः सदत सुप्रणीतयः। अत्ता हवीꣳषि प्रयतानि बर्हिष्यथा रयिꣳ सर्ववीरन्दधातन॥ बर्हिषदः पितर ऊत्यर्वागिमा वो हव्या चकृमा जुषध्वम्। त आ गताऽ*वसा शन्तमेनाथास्मभ्यꣳ ॥ [६६] ॥ शय्योँररपो दधात॥ आऽहम्पितॄन्थ् सुविदत्राꣳ अवित्सि नपातञ्च विक्रमणञ्च विष्णोः। बर्हिषदो ये स्वधया सुतस्य भजन्त पित्वस्त इहाऽऽगमिष्ठाः॥ उपहूताः पितरः सोम्यासो बर्हिष्येषु निधिषु प्रियेषु। त आ गमन्तु त इह श्रुवन्त्वधि ब्रुवन्तु ते अवन्त्वस्मान्॥ उदीरतामवर उत् परास उन्मद्ध्यमाः पितरः सोम्यासः। असु ॥ [६७] ॥

य्यँ ई॒यु॒र॑वृ॒का ऋ॑त॒ज्ञास्ते नो॑ऽवन्तु पि॒तरो॒ हवे॑षु॥ इ॒दम्पि॒तृभ्यो॒ नमो॑ अस्त्व॒द्य ये पूर्वा॑सो॒ य उप॑रास ई॒युः। ये पार्थि॑वे॒ रज॒स्या निष॑त्ता॒ ये वा॑ नू॒नꣳ सु॑वृ॒जना॑सु वि॒क्षु॥ अधा॒ यथा॑ नः पि॒त॒रः परा॑सः प्र॒त्नासो॑ अग्न ऋ॒तमा॑शुषा॒णाः। शुचीद॑य॒न् दीधि॑तिमुक्थ॒शास॒ः क्षामा॑ भि॒न्दन्तो॑ अ॒रु॒णीरप॑ व्रन्न्॥ यद॑ग्ने ॥ [६८] ॥ कव्यवाहन पि॒तॄन् य॑क्ष्यृ॒ता॒वृधः॑। प्र च॑ ह॒व्यानि॑ वक्ष्यसि दे॒वेभ्य॑श्च पि॒तृभ्य॒ आ॥ त्वम॑ग्न ईडि॒तो जा॑तवे॒दोऽवा᳚ड्ढ॒व्यानि॑ सुर॒भीणि॑ कृ॒त्वा। प्रादाः᳚ पि॒तृभ्यः॑ स्व॒धया॒ ते अ॑क्षन्न॒द्धि त्वन्दे॑व॒ प्रय॑ता ह॒वीꣳषि॑॥ मात॑ली क॒व्यैर् य॒मो अङ्गि॑रोभि॒र् बृह॒स्पति॒र् ऋक्-क्व॑भिर् वावृधा॒नः। याꣳश्च॑ दे॒वा वा॑वृ॒धुर्ये च॑ दे॒वान्थ् स्वाहा॒ऽन्ये स्व॒धया॒ऽन्ये म॑दन्ति ॥ [६९] ॥ इ॒मय्यँ॑म प्रस्त॒रमा हि सीदाऽङ्गि॑रोभिः पि॒तृभि॑ः स॑व्विँदा॒नः। आ त्वा॒ मन्त्राः᳚ कविश॒स्ता व॑हन्त्वे॒ना रा॑जन्ह॒विषा॑ मादयस्व॥ अङ्गि॑रोभि॒रा ग॑हि य॒ज्ञिये॑भि॒र् यम॑ वैरू॒पैरि॒ह मा॑दयस्व। विव॑स्वन्तꣳ हु॒वे यः पि॒ता ते॒ऽस्मिन्य॒ज्ञे ब॒र्॒हिष्या नि॒षद्य॑॥ अङ्गि॑रसो नः पि॒तरो॒ नव॑ग्वा॒ अथ॑र्वाणो॒ भृग॑वः सो॒म्यास॑ः। तेषा᳚व्ँव॒यꣳ सु॑म॒तौ य॒ज्ञिया॑ना॒मपि॑ भ॒द्रे सौ॑मन॒से स्या॑म ॥ [७०] ॥

(भ॒वा॒ स्मभ्य॒ म॒सुं॒ यद॑ग्ने मदन्ति सौमन॒स एक॑ञ्च) ॥ १२ ॥

समाप्ति कोर्वैः

(स॒मिध॒ श्चक्षु॑षी प्र॒जाप॑ति॒राज्यं॑ दे॒वस्य॒ स्फ्यं ब्र॑ह्मवा॒दिनो॒ऽद्भि र॒ग्नेस्त्रयो॒ मनुः॑ पृथि॒व्याः प॒शवो॒ ऽग्नीधे॑ दे॒वा वै य॒ज्ञस्य॑ यु॒क्ष्वो शन्त॑स्त्वा॒ द्वाद॑श)

(स॒मिधो॑ या॒ज्या॑तस्मा॒न्नाभा॒गꣳहि तमन्वि॑त्या॑ह प्र॒जा वा आ॒हेत्या॑ह यु॒क्ष्वा हि सं॑त॒तिः)

(स॒मिधः॑ सौमन॒से स्या॑म)

(वा॒य॒व्यं॑ प्र॒जाप॑ति रा॒दि॒त्येभ्यो॑ दे॒वा वि॒श्वरू॑पः स॒मि॒धः षट्)

॥ हरिः ॐ ॥

द्वितीयकाण्डे षष्ठः प्रश्नः समाप्तः

अनुवाकाः	पञ्चशत्यः
१२	७०

ॐ